**अतिवृत्ति** स्त्री अति+वृत-क्तिन् । अतिक्रमे । वृत्तिर्जीविका तामतिक्रान्ते त्रि० ।

**अतिवृद्ध** त्रि० अत्यन्तं वृद्धः । अत्यन्तवृद्धियुक्ते, अतिजरति च । तृणादिचर्वणासमर्थायां गवि स्त्री । "अतिवृद्धामतिकृशामिति" स्मृतिः "अतिवृद्धाम् तृणच्छेदनासमर्थामिति" रघु० । "चतुःशतं समारभ्य यावद्वर्षसहस्रकम् । अतिवृद्धः स मन्त्रस्तु सर्वशास्त्रेषु वर्ज्जित इति तन्त्रोक्ते मन्त्रभेदे पु० ।

**अतिवृष्टि** स्त्री अति+वृष-क्तिन् । अत्यन्तवृष्टौ शस्योपघातकोपद्रवरूपे "अतिवृष्टिरनावृष्टिः शलभाः मूषिकाः खगाः प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः" इत्युक्ते ईतिभेदे "निरीतिभावं गमितेऽतिवृष्टय" इति नैष० ।

**अतिवेध** पु० अत्यन्तोवेधः सम्पर्कः । "अरुणोदयवेधः स्यात् सार्द्धन्तु घटिकाद्वयम् । अतिवेधोद्विघटिका प्रभासन्दर्शना रवेः" इतिस्मृत्युक्ते एकादश्याः दशमीसम्पर्कभेदे, "यातुधानं व्रतं योगे, महावेधे तु राक्षसम् । जम्भासुरस्यातिवेधः" इति ब्रह्मवै० जम्भासुरस्य फलदायकं न तु कर्त्तुः फलदम् तेन निन्दाश्रवणात् सा एकादशी नैवोपास्येति ।

**अतिवेगित** त्रि० अतिवेगो जातोऽस्य तारा० इतच् । जाताधिकवेगे "भौमादयोऽल्पमूर्त्तित्वाच्छीघ्रमन्दोच्चसंज्ञकैः दैवतैरपकृष्यन्ते सुदूरमतिवेगिताः" इति सूर्य्य० ।

**अतिवेल** त्रि० अतिक्रान्तो वेलां मर्य्यादाम् कूलं वा अत्या०स० । अतिशयिते, निर्मर्य्यादे, समुद्रादिकूलातिक्रमकारके च । अतिक्रमे अव्ययी० । वेलातिक्रमे अव्य० ।

**अतिवोढृ** त्रि० अति+वह-तृच् । अतिवहनकर्त्तरि प्रापके "अग्निर्वै पथोऽतिवोढा स एतानतिवहतीति" श्रुतिः । स्त्रियां ङीप् ।

**अतिव्यथन** न० अति+व्यथ-णिच्-ल्युट् घटा० ह्रस्वः । अत्यन्तपीड़ने, "सपत्ननिष्पत्नादतिव्यथने" इति पा० ।

**अतिव्यथा** स्त्री अत्यन्ता व्यथा । अत्यन्तपीड़ायाम् ।

**अतिव्यय** त्रि० अतिशयितोव्ययः । अपरिमितव्यये यस्य यावान् व्ययउचितस्ततोऽधिकव्यये व्ययनियमस्य, "पादेन तस्य पारक्यं कुर्य्यात् सञ्चयमात्मवान् । अर्द्धेन चात्मभरणं नित्यनैमित्तिकं तथा पादार्द्धार्द्धेन सर्वस्य मूलभूतं विवर्द्धयेत् एवमारभतः पुंसामर्थः साफल्यमृच्छतीति" मार्क०पुरा० । "अतिव्ययात् स्वल्पकालात् क्लिश्येदर्थपरिक्षयादिति" नीति० ।

**अतिव्याप्ति** स्त्री अतिशयेन लक्ष्यमलक्ष्यञ्चाविशिष्य व्याप्तिः व्यापनम् । अतिशयव्यापने (लक्ष्यस्येवालक्ष्यस्यापि व्यापने) । तथा च यत्र यस्य स्थितिरुचिता ततोऽन्यत्रापि तस्य सम्बन्धे प्रसक्ते अतिव्याप्तिः । यथा पृथिव्याः गन्धो लक्षणं तत्रैव तस्य स्थितिरुचिता तस्य वाय्वादौ सत्त्वप्रसङ्गे अतिव्याप्तिः । यथा वा धूमे वह्नेर्व्यापकता न तु जले, तत्र प्रसक्तौ अतिव्याप्तिः । एवञ्च पृथिव्या रूपवत्त्वं लक्षणम् जलादावतिव्याप्तम् । "परिगणनं कर्त्तव्यमव्याप्त्यतिव्याप्तिदोषवारणायेति" सिद्धा०कौ० ।

**अतिशक्करी** पु० अतिक्रान्ता शक्करीमेकाक्षराधिक्यात् । पञ्चदशाक्षरपादके वृत्तभेदे "शक्करी सातिपूर्वा स्यादिति, वृत्त० ।

**अतिशक्ति** स्त्री अतिशयिता शक्तिः कर्म्मसाधनं सामर्थ्यम् देहजं बलम् वा प्रा०स० । अतिशयिते सामर्थ्ये, अधिकवीर्य्ये च "स वीर्य्यमतिशक्तिभागि"त्यमरः । अतिक्रान्तः शक्तिम् अत्या०स० । सामर्थ्यातिक्रमकारके त्रि० । अतिशयिता शक्तिर्यस्य ब० । अतिशयबलवति त्रि० । अतिक्रमेऽव्ययी० । शक्त्यतिक्रमे अव्य० ।

**अतिशय** पु० अति+शीङ्-अच् । आधिक्ये, अतिरेके च । अतिक्रान्तः शयं हस्तम् अत्या०स० । हस्तातिक्रमकारके त्रि० । अतिशय+अस्त्यर्थे अच् । अतिशयवति । "अतिशयरयशालिनेति" काद० । द्वारे व्यापारे च "चिरध्वस्तं फलायालं न कर्म्मातिशयं विना"त्युदयनः ।

**अतिशयन** न० अति+शी-भावे ल्युट् । अतिरेके अतिशयार्थे । अतिक्रान्तं शयनम् अत्या०स० ।

**अतिशयित** त्रि० अति+शीङ्-क्त । अधिके, अतिक्रान्ते च ।

**अतिशयिन्** त्रि० अति+शी-इनि । अतिशयान्विते स्त्रियां ङीप् । "इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः" इति काव्यप्र० ।

**अतिशयोक्ति** स्त्री अतिशयेन उक्तिर्निर्देशः यत्र । अलङ्कारशास्त्रप्रसिद्धे (सा०१०परि०) "सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्य्ययौ । पौर्वापर्य्यात्ययः कार्य्यहेत्वोः सा पञ्चधा मते"त्युक्तलक्षणे अर्थालङ्कारभेदे यथा "विश्लेषदुःखादिव बद्धमौन"मित्यत्र चेतनगतं मौनित्वमन्यत्, अचेतनगतञ्चान्यदिति द्वयोर्भेदेऽपि अभेदः । "अन्यदेवाङ्गलावण्यमन्याः सौरभसम्पद" इत्यत्र लावण्यादेरभेदेऽपि अन्यशब्देन भेदः इति" "अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु? कान्तिप्रद" इत्यादौ श्लोके "वेदाभ्यासजड़ः कथं नु? विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवे"दित्यादिना विधातुः स्रष्टृत्वसम्बन्धेऽपि तदसम्बन्धः । "यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम् तदोपमीयते तस्या वदनं चारुलोचनमिति" यदि शब्दबला-